
DSSSB TGT & PGT
दिल्ली अधीनस्थ सेवा चयन बोर्ड
ROJGAR
ANKIT
Part-B
SCHOLAR BATCH
संस्कृत
शुकनासोपदेश
Part -2
LIVE
20-06-2024 05:00 PM

पत्नी       पुत्र

राजा तारापीड + विलासवती = चन्द्रापीड

↓ मंत्री

शुकनास + मनोरमा = वैशम्पायन

# शुकनासोपदेशः

'तात ! चन्द्रापीड ! विदितवेदितव्यस्य श्रधीतसर्व- शास्त्रस्य ते नाल्पमप्युपदेष्टव्यमस्ति । केवलञ्च' निसर्गत एव अभानुभेद्यमरत्नालोकच्छेद्यमप्रदीपप्रभापनेयमतिगहनं तमो यौवनप्रभवम् । अपरिणामोपशमो दारुणो लक्ष्मीमदः । कष्ट- मनञ्जनवर्त्तसाध्यमपरम्' ऐश्वर्यतिमिरान्धत्वम् । श्रशिशिरो- पंचारहार्य्योऽतितीव्रः दर्पदाहज्वरोष्मा । सततममूलमन्त्र- शम्यः विषमो विषयविषास्वादमोहः । नित्यमस्नानशौच- बाध्यः' बलवान् रागमलावलेपः । श्रजस्रमक्षपावसानप्रबोधा घोरा च राज्यसुखसन्निपातनिद्रा भवति इत्यतः विस्तरेणा- भिधीयसे ।

**संस्कृत टीका -** तात- पुत्र !, चन्द्रापीड ! विदितवेदितव्यस्य - विदितं ज्ञातं वेदितव्यं ज्ञातव्यविषयः येन तस्य ( ब० स० ) प्रधीतसर्वशास्त्रस्य - प्रधीतानि पठितानि सर्वाणि सकलानि शास्त्राणि वेदपुराणादीनि येन तस्य ( ब० स० ), ते तव ननहि, प्रत्पमपि किञ्चिदपि उपदेष्टव्यम कथनीयम् अस्ति — विद्यते। केवल किन्तु यौवनप्रभवम् - यौवनात् तारुण्यात् प्रभवम् समुत्पन्नम् ( पं० न० ), तमः -- तमोगुणोत्पन्नाज्ञानरूपोऽन्वकारः, निसर्गत एव – स्वभावत एव (अतिदुर्दमनीयं भवति यतो हि तत्) प्रभानु- भेद्यम् - भानुना सूर्येण अभेद्यम् अनुच्छेद्यम् अरस्तालोकच्छेद्यम् - रत्नानां मणी- नाम् आलोकेन प्रभया श्रच्छेद्यम् विनाशयितुमशक्यम्, श्रप्रदीपप्रभावनेयम्- प्रदीपानां प्रभया न श्रपनेयम् दूरीकर्तुं न शक्यम् ( श्रतएव ) प्रतिगहनम्-

अत्यन्तदुर्धर्षम् (भवति नराणामिति शेषः) । लक्ष्मीमदः – लक्ष्म्याः सम्पदः मदः गर्वः ( ष० त०), अपरिणामोपशमः - नास्ति परिणामे श्रन्तिमावस्यायाम् उपशमः निवृत्तिः यस्य स तथाभूतः (न० ब० स० ), ( प्रतएव ) दारुणः- भयंकर : (भवति) । अपरम् — एतदतिरिक्तम् ऐश्वयं तिमिरान्धत्वम् — ऐश्वर्यं सम्पत्तिः एव तिमिरं तिमिरसंज्ञकनेत्ररोगाः (मयू० स० ) तेन अन्धत्वम् अन्धता ( वृ० त०), अनञ्जनवत्तसाध्यम् — प्रञ्जनवत्तिना अञ्जनशलाकया न साध्यम् न प्रतीकार्यम् अचिकित्स्यमित्यर्थः ( भवति श्रतएव ), कष्टम् — क्लेशकरम् (भवति)। प्रतितीव्र :- प्रत्यन्ततीक्ष्णः दर्पदाहज्वरोष्मा - दर्पस्य ( सम्पत्तेः ) गर्वस्य दाहज्वरः तीक्ष्णतापः तस्य ऊष्मा उष्णता ( ष० त०), अशिशिरोपचार- हार्यः शिशिरैः शीतलः उपचारैः चन्दनादिशेत्यव्यापारः न

हार्यः न निवारयितुं शक्यः । विषमः – प्रचण्डः, विषयविषास्वादमोह :- विषयाः सुरतादयः एव विपाणि गरलानि (मयू० स०) तेषाम आस्वादेन उपभोगेन (त० त०) उत्पत्रः मोहः जडता, सततम् — प्रनिशम्, अमूलमन्त्रशम्यः - मूलैः श्रोषधिमूलैः मन्त्रः विषविनाशकमन्त्रैः न शम्यः न शमयितुं शक्यः । बलवान् — नितान्तः, राग- मलावलेपः — रागः विषयानुरागः एव मलं पंकः ( मयू० स० ) तस्य अवलेपः लेपनम् ( ष० त०), नित्यं - प्रतिदिनम्, प्रस्नानशीचबाध्य : – स्नान शुद्धिभ्यां न वाध्यः न प्रपनेतुं शक्यः । च पुनः घोरा - दारणा, राज्यसुखसन्निपातनिद्रा- राज्यसुखस्य राज्योपभोगजन्यानन्दस्य सन्निपातः संघातः ( ष० त० ) स एव निद्राशयनम् (मयू० स० ), घजस्रम्, मनवरतम्, पक्षपावसानप्रबोधा न विद्यते-

क्षपावसाने राज्यन्ते प्रबोधः जागरणं चैतन्योदयो वा यस्यां सा तादृशी (न० ब० स०), भवति — जायते, इत्यतः - प्रस्मात् कारणात्, विस्तरेण — विस्तारपूर्वक वारंवारं वा अभिधीयसे कथ्यसे त्वमिति शेषः ।

**हिन्दी अनुवाद --** वत्स चन्द्रापीड ! जानने योग्य विषयों को जानने वाले एवम् समस्त शास्त्रों का अध्ययन कर चुकने वाले तुम्हें थोड़ा भी उपदेश नहीं देना है । किन्तु ( केवल यही कहना है कि ) युवावस्था में उत्पन्न होने वाला ( अज्ञान रूप ) अन्धकार स्वभाव से ही सूर्य के द्वारा विनष्ट करने योग्य नहीं होता, भणियों को प्रभा से उच्छिन्न नहीं किया जा सकता, दीपक के प्रकाश से हटाया नहीं जा सकता और अत्यंत दुर्दमनीय होता है। धन-सम्पत्ति का भयंकर मद अन्तिम अवस्था में भी शान्त नहीं होता। दूसरा,

ऐश्वर्य रूप तिमिर ( नामक रोग) से उत्पन्न होने वाला अन्धापन, जिनकी चिकित्सा मंजन लिप्त शलाका से नहीं की जा सकती, कष्टदायक होता है । (सम्पत्ति के ) अभिमान रूप तीव्र ज्वर की गरमी शीतल उपचारों से दूर करने योग्य नहीं होती । विषय रूप विष के उपभोग से उत्पन्न होने वाला कठिन मोह निरन्तर औषधियों एवम् मन्त्रों (के प्रयोग ) द्वारा शमन करने योग्य नहीं होता । ( विषयों के प्रति ) अनुराग रूप मल का अत्यन्त लेप नित्य किये जाने वाले स्नान एवम् शुद्धि के द्वारा हटाने योग्य नहीं होता । और सर्वदा राज्य-सुखों के समूह रूप घोर निद्रा रात्रि के अवसान में भी नहीं खुलती । इसलिए विस्तार से तुम्हें कहा जाता है ।

गर्भेश्वरत्वमभिनवयौवनत्वमप्रतिमरूपत्वममानुषशक्ति-
त्वञ्चेति महतीयं खल्वनर्थपरम्परा । सर्वाविनयानामेकैक- मप्येषामायतनम्
किमुत समवायः । यौवनारम्भे च प्रायः शास्त्रजलप्रक्षालननिर्मलापि
कालुष्यमुपयाति बुद्धिः । श्रनु- ज्झितधवलतापि' सरागैव' भवति यूनां दृष्टिः
। श्रपहरति च वात्येव शुष्कपत्रं समुद्भूतरजो भ्रान्तिरतिदूरम् आत्मेच्छया
यौवनसमये पुरुषं प्रकृतिः । इन्द्रियहरिणहारिणी च सततम- तिदुरन्तेयम्'
उपभोगमृगतृष्णिका । नवयौवनकषायिता- त्मनश्च सलिलानीव तान्येव
विषयस्वरूपाण्यास्वाद्यमानानि मधुरतराण्यापतन्ति मनसः । नाशयति च
दिङ्मोह इवोन्मार्ग- प्रवर्तकः पुरुषमत्यासङ्गो विषयेषु ।

Mon - शाम 5 बजे

**संस्कृत टीका**- गर्भेश्वरत्वम् – गर्भात् आबाल्यात् ईश्वरत्वम् ऐश्वर्य- शालित्वम् (पं० त०), अभिनवयौवनत्यम् - - अभिनवं यौवनम् यस्य ( ब० स० ) तस्य भावः तत्त्वम् नूतनतारुण्यसम्पन्नत्वमित्यर्थः, अप्रतिमरूपत्वम् अप्रतिमम् उपमारहितं रूपं यस्य ( ब० स० ) तस्य भावः तत्त्वम् निरुपमसौन्दर्यशालित्व- मित्यर्थः च तथा धमानुषाक्तित्वम् - प्रमानुषी लोकोत्तरा शक्तिः सामथ्र्य यस्य ( ब० स० ) तस्य भावः तत्त्वम् लोकोत्तरशक्तिविशिष्टत्वमित्यर्थः, इति, इयं खलु निश्चयेन महती - गुर्वी, अनर्थपरम्परा प्रनयनां विपत्तीनां परम्परा श्रेणी ( प० त० ), एषाम् - गर्भश्वरत्वादीनां (मध्ये ) एकैकमपि - एकम् एकम् श्रपि सर्वाविनयानाम् सर्वेषाम् समेयाम् श्रविनयानाम् श्रीत्या- नाम्, घायतनम् — गृहम्, समवायः

समूहः, ( अर्थात् एतेषां समूहविषये ) किमुत — किं कथनीयमित्यर्थः । च पुनः गौवनारम्भे — यौवनस्य तारुण्यस्य प्रारम्भ प्रारम्भिके काले ( ८० त० ) प्रायः - बाहुल्येन, शास्त्रजलप्रक्षालन- निर्मलापि — शास्त्रमेव जलं (मयू० स० ) तेन प्रक्षालनं घावनं (तृ० ० ) तेन निर्मलापि स्वच्छापि (तृ० त०) बुद्धिः - मतिः, कालुष्यं - मालिन्यम्, उपयाति - प्राप्नोति । यूनाम् — युवकानाम्, दृष्टिः प्रवलोकनम् धनुज्झितघवलतापि -- उज्झिता न व्यक्ता धवलता स्वच्छता यया सा तथाभूतापि (न० ब० स० ), सरागंव-- रागेण रक्तिमया सह वर्तमानव ( सह ब० स० ) (भवति) । च- किञ्च यौवनसमये युवावस्थायां समुद्भूतरजो भ्रान्तिः -- समुद्भूता समुत्पन्ना रजसा रजोगुणेन भ्रान्तिः भ्रमः यस्यां सा तथाभूता (पक्षे -- समुद्भूता रजसां रेणूनां भ्रान्तिः भ्रमणं यस्याम्

सा), प्रकृतिः स्वभावः, वाल्या वायुसमूहः वात- कलिकेति यावत् शुष्कपत्रं नौरसवर्णम् इव तद्वत् पुरुषं — मनुष्यम्, प्रारमेच्छया स्वेच्छया यथेच्छमित्यर्थः प्रतिद्दरं - विवेकात् परं ( पक्षे – सुदूर- देशम्), प्रपहरति नयति । चकिञ्च प्रतिदुरन्ता - प्रत्यन्तदुःखावसाना, इयम् - एषा, उपभोगमृगतृष्णिका — उपभोगः सुरतादिः स एव मृगतृष्णिका मरमरीचिका (मयू० स० ), सततम् - सन्ततम्, इन्द्रियहरिणहारिणी - इन्द्रि - पाणि एव करणानि एवं हरिणाः मृगाः (मयू० स० ) तेपां हारिणी हरणशीला (प० त० ) ( वर्तते ) । च पुनः नवयौवनकषायितात्मनः नवेन नूतनेन

जीवनेन तारुण्येन कपायितः विपरिवर्तितः रागद्वेषादिभिः युक्तीकृतः मात्मा स्वयं यस्य तथाविघस्य मनसः- ( तरुणपुरुषस्य ) चेतसः, सलिलानि इव, जलानि इव, तानि एव प्रसिद्धानि एव, विषयस्वरूपाणि भोग्यपदार्थाः, भास्वाद्य- रानानि-धनुभूयमानानि, (सन्ति), मधुरतराणि - मिष्टतराणि, प्रापतन्ति - रतीयन्ते च तथा दिमोह दव - दिग्भ्रान्तिरिव, उन्मार्गप्रर्वतकः कुपथ-

प्रेरकः, विषयेषु भोग्यपदार्थेषु प्रत्यासङ्गः प्रतीवासक्तिः, पुरुषम् नरम्-नाशयति-- विनाशं प्रापयति ।

**हिन्दी अनुवाद --** जन्मतः प्राप्त ऐश्वर्य, नई जवानी, अनुपम सौन्दर्य और अलौकिक शक्ति - यह निश्चय ही धन की महान् परम्परा (कारण -कोटि ) है। इनमें से एक-एक भी सभी प्रकार के अविनयों (दुःशीलताओं) के निवास- स्थान है, ( इनके ) समूह का तो कहना ही क्या । युवावस्था के प्रारम्भ में ( मनुष्य की ) बुद्धि शास्त्र रूपी जल से धुल कर निर्मल होने पर भी प्रायः कलुषित हो जाती है। युवकों की दृष्टि स्वच्छता का त्याग न करने पर भी राग (लालिमा या अनुराग ) से युक्त ही रहती है । जवानी के समय रजोगुण से उत्पन्न भ्रान्ति वाली ( वात्या - पक्ष में — धूलों के चक्कर से युक्त ) प्रकृति पुरुष को उसी प्रकार अपनी इच्छा से अत्यन्त दूर ( अर्थात् विवेक

से परे; वात्या — पक्ष में — सुदूर स्थान में ) खींच ले जाती है जैसे वात्या ( बवंडर ) सूखे पत्ते को । अत्यन्त दुःखद परिणाम वाली यह ( विषयों के) उपभोग रूप मृगतृष्णा सर्वदा इन्द्रिय रूपी हरिणों का विनाश करने वाली है। नव यौवन द्वारा परिवर्तित ( अर्थात् राग-द्वेषादि से युक्त किये हुए) मन को जल को भाँति वे ही भोग्य वस्तुएँ ग्रास्वादित होने पर मधुर प्रतीत होती हैं (पर्यात् जैसे जल मधुर न होने पर भी कषायरसयुक्त जिह्वा को मधुर प्रतीत होता है उसी तरह भोग्य वस्तुएँ गधुर न होने पर भी अनुरक्त मन को मधुर लगती हैं) । दिग्भ्रम की तरह कुपथ पर चलाने वाली विषयों की अत्यन्त आसक्ति मनष्य को विनष्ट कर देती है ।